श्री सूर्य कवचं (जगद्विलक्षणं)

श्री सूर्य कवचं (जगद्विलक्षणं)

बृहस्पतिरुवाच |
इंद्र शृणु प्रवक्ष्यामि कवचं परमाद्भुतं |
यद्धृत्वा मुनयः पूता जीवन्मुक्ताश्च भारते || 1 ||

कवचं बिभ्रतो व्याधिर्न भियाऽऽयाति सन्निधिं |
यथा दृष्ट्वा वैनतेयं पलायंते भुजंगमाः || 2 ||

शुद्धाय गुरुभक्ताय स्वशिष्याय प्रकाशयेत् |
खलाय परशिष्याय दत्त्वा मृत्युमवाप्नुयात् || 3 ||

जगद्विलक्षणस्यास्य कवचस्य प्रजापतिः |
ऋषिश्छंदश्च गायत्री देवो दिनकरः स्वयं || 4 ||

व्याधिप्रणाशे सौंदर्ये विनियोगः प्रकीर्तितः |
सद्यो रोगहरं सारं सर्वपापप्रणाशनं || 5 ||

ॐ क्लीं ह्रीं श्रीं श्रीसूर्याय स्वाहा मे पातु मस्तकं |
अष्टादशाक्षरो मंत्रः कपालं मे सदाऽवतु || 6 ||

ॐ ह्रीं ह्रीं श्रीं श्रीं सूर्याय स्वाहा मे पातु नासिकां |
चक्षुर्मे पातु सूर्यश्च तारकं च विकर्तनः || 7 ||

भास्करो मेऽधरं पातु दंतान् दिनकरः सदा |
प्रचंडः पातु गंडं मे मार्तांडः कर्णमेव च |
मिहिरश्च सदा स्कंधे जंघे पूषा सदाऽवतु || 8 ||

वक्षः पातु रविः शश्वन्नाभिं सूर्यः स्वयं सदा |
कंकालं मे सदा पातु सर्वदेवनमस्कृतः || 9 ||

कर्णौ पातु सदा ब्रध्नः पातु पादौ प्रभाकरः |
विभाकरो मे सर्वांगं पातु संततमीश्वरः || 10 ||

इति ते कथितं वत्स कवचं सुमनोहरं |
जगद्विलक्षणं नाम त्रिजगत्सु सुदुर्लभं || 11 ||

पुरा दत्तं च मनवे पुलस्त्येन तु पुष्करे |
मया दत्तं च तुभ्यं तद्यस्मै कस्मै न देहि भोः || 12 ||

व्याधितो मुच्यसे त्वं च कवचस्य प्रसादतः |
भवानरोगी श्रीमांश्च भविष्यति न संशयः || 13 ||

लक्षवर्षहविष्येण यत्फलं लभते नरः |
तत्फलं लभते नूनं कवचस्यास्य धारणात् || 14 ||

इदं कवचमज्ञात्वा यो मूढो भास्करं यजेत् |
दशलक्षप्रजप्तोऽपि मंत्रसिद्धिर्न जायते || 15 ||

इति श्रीब्रह्मवैवर्ते महापुराणे गणपतिखंडे एकोनविंशोऽध्याये बृहस्पति कृत श्री सूर्य कवचं |